# *मत्स्यपुराणप्रशस्तिः*

*प्रो. गंगाधर पण्डा*

सूत उवाच

एतद्वः कथितं सर्वं यदुक्तं विश्वरूपिणा।
मात्स्यं पुराणमखिलं धर्मकामार्थसाधनम्।।
यत्रादौ मनुसम्वादो ब्रह्माण्डकथनन्तथा।
सांख्यं शारीरकम्प्रोक्तं चतुर्मुखमुखोद्भवम्।।
देवासुराणामुत्पत्तिर्मारुतोत्पत्तिरेव च।
मदनद्वादशीतद्वल्लोकपालाभिपूजनम् ।।
मन्वन्तराणामुद्देशो वैन्यराजाभिवर्णनम्।
सूर्य्याद्वैवस्वतोत्पत्तिर्बुधस्यागमनन्तथा ।।
पितृवंशानुकथनं श्राद्धकालस्तथैव च।
पितृतीर्थप्रवासश्च सोमोत्पत्तिस्तथैव च।।
कीर्त्तनंसोमवंशस्य ययातिचरितं तथा।
कार्त्तवीर्यस्य माहात्म्यं वृष्णिवंशानुकीर्त्तनम्।।
भृगुशापस्तथा विष्णोर्दैत्यशापस्तथैव च।
कीर्त्तनं पुरुषेशस्य वंशो हौताशनस्तथा।।
पुराणकीर्त्तनं तद्वत् क्रियायोगस्तथैव च।
व्रतं नक्षत्रसंख्याकं मार्कण्डशयनं तथा।।
कृष्णाष्टमीव्रतं तद्वद्रोहिणी चन्द्रसंज्ञितम्।
तडागविधिमाहात्म्यं पाद्योत्सर्ग एव च।।
सौभाग्य-शयनं तद्वदगस्त्यव्रतमेव च।
तथानन्ततृतीया तु रसकल्याणिनी तथा।।
आर्द्रानन्दकरी तद्वद्व्रतं सारस्वतं पुनः।
उपरागाभिषेकश्च सप्तमीस्नपनं पुनः।।
भीमाख्या द्वादशी तद्वदनङ्गशयनं तथा।
अशून्यशयनं तद्वत्तथैवांगारकव्रतम्।।
सप्तमीसप्तकं तद्वद्विशोकद्वादशी तथा।
मेरुप्रदानं दशधा ग्रहशान्तिस्तथैव च।।
ग्रहस्वरूपकथनं तथा शिवचतुर्दशी।
तथा सर्वफलत्यागः सूर्यवारव्रतं तथा।।

संक्रान्तिस्नपनं तद्वद्विभूतिद्वादशी व्रतम्।
षष्ठिव्रतानां माहात्म्यं तथा स्नानविधिक्रमः।।
प्रयागस्य तु माहात्म्यं सर्वतीर्थानुकीर्तनम्।
पैलाश्रमफलं तद्वद् द्वीपलोकानुकीर्तनम्।।
तथान्तरिक्षचारश्च ध्रुवमाहात्म्यमेव च।
भवनानि सुरेन्द्राणां त्रिपुराशोधने तथा।।
पितृपिण्डदमाहात्म्यं मन्वन्तरविनिर्णयः।
वज्राङ्गस्य तु सम्भूतिः तारकोत्पत्तिरेव च।।
तारकासुरमाहात्म्यं ब्रह्मदेवानुकीर्तनम्।
पार्वतीसम्भवस्तद्वत् तथा शिवतपोवनम्।।
अनङ्गदेहदाहस्तु रतिशोकस्तथैव च।
गौरीतपोवनं तद्वद् विश्वनाथप्रसादनम् ।।
पार्वतऋषिसम्वादः तथैवोद्वाहमङ्गलम् ।
कुमारसम्भवस्तद्वत् कुमारविजयस्तथा।।
तारकस्य वधो घोरो नरसिंहोपवर्णनम्।
वाराणस्यास्तु माहात्म्यं नर्मदायास्तथैव च।।
प्रवरानुक्रमस्तद्वत् पितृनाथानुकीर्तनम्।
ततोभयमुखीदानं दानंकृष्णाजिनस्य च।।
तथा सावित्र्युपाख्यानं राजधर्मास्तथैव च।
यात्रानिमित्तकथनं स्वप्नमाङ्गल्यकीर्तनम्।।
वामनस्य तु माहात्म्यं तथैवादिवराहकम्।
क्षीरोदमथनं तद्वत्कालकूटाभिशासनम्।।
प्रासादलक्षणन्तद्वन्मण्डपानान्तु लक्षणम्।
पुरुवंशे तु सम्प्रोक्तं भविष्यद्राजवर्णनम्।।
तुलादानादि बहुशो महादानानुकीर्तनम्।
कल्पानुकीर्तनं तद्वद्ग्रन्थानुक्रमणी तथा।।
एतत्पवित्रमायुष्यम् एतत्कीर्तिविवर्धनम् ।
एतत्पवित्रं कल्याणं महापापहरं शुभम्।।

अस्मात् पुराणादपि पादमेकं पठेत्तु यः सोऽपि विमुक्तपापः।
नारायणाख्यं पदमेति नूनमनङ्गवद्दिव्यसुखानि भुङ्क्ते।।